## सुन्दरकाण्ड त्रिचत्वारिंशः सर्गः (४३) - ॥ चैत्य प्रासाद दाहः ॥

ततः स किङ्करान् हत्वा हनुमान् ध्यान मास्थितः ।
वनं भग्नं मया चैत्य प्रासादो न विनाशितः ॥ १ ॥

तस्मात् प्रासाद मप्येव मिमं विध्वंसयाम् यहम् ।
इति सञ्चिन्त्य मनसा हनुमान् दर्शयन् बलम् ॥ २ ॥

चैत्य प्रासाद माप्लुत्य मेरु शृङ्ग मिवोन्नतम् ।
आरुरोह हरि श्रेष्ठो हनुमान् मारुतात्मजः ॥ ३ ॥

आरुह्य गिरि सङ्काशं प्रासादं हरियूथपः ।
बभौ स सुमहातेजाः प्रतिसूर्य इवोदितः ॥ ४ ॥

सम्प्रधृष्य च दुर्धर्षं चैत्य प्रासाद मुत्तमम् ।
हनुमान् प्रज्वलँल् लक्ष्म्या पारियात्रोपमोऽभवत् ॥ ५ ॥

स भूत्वा सुमहाकायः प्रभावान् मारुतात्मजः ।
धृष्ट मास्फोटयामास लङ्कां शब्देन पूरयन् ॥ ६ ॥

तस्यास्फोटित शब्देन महता श्रोत्र घातिना ।
पेतुर् विहङ्गमास् तत्र चैत्य पालाश्च मोहिताः ॥ ७ ॥

अस्त्र विज्जयतां रामो लक्ष्मणश्च महाबलः ।
राजा जयति सुग्रीवो राघवेणाभि पालितः ॥ ८ ॥

दासोऽहं कोसलेन्द्रस्य रामस्याक्लिष्ट कर्मणः ।
हनुमान् शत्रु सैन्यानां निहन्ता मारुतात्मजः ॥ ९ ॥

न रावणसहस्रं मे युद्धे प्रतिबलं भवेत् ।
शिलाभिस्तु प्रहरतः पादपैश्च सहस्रशः ॥ १० ॥

अर्दयित्वा पुरीं लङ्का मभिवाद्य च मैथिलीम् ।
समृद्धार्थो गमिष्यामि मिषतां सर्वरक्षसाम् ॥ ११ ॥

एवमुक्त्वा महाबाहुश् चैत्यस्थो हरियूथपः ।
ननाद भीमनिर्ह्रादो रक्षसां जनयन्भयम् ॥ १२ ॥

तेन शब्देन महता चैत्यपालाः शतं ययुः ।
गृहीत्वा विविधा नस्त्रान् प्रासान् खड्गान् परश्वधान् ॥ १३ ॥

विसृजन्तो महाकाया मारुतिं पर्यवारयन् ।
ते गदाभिर् विचित्राभिः परिघैः काञ्चनाङ्गदैः ॥ १४ ॥

आजघ्नुर् वानर श्रेष्ठं बाणैश् चादित्य सन्निभैः ।
आवर्त इव गङ्गायास् तोयस्य विपुलो महान् ॥ १५ ॥

परिक्षिप्य हरि श्रेष्ठं स बभौ रक्षसां गणः ।
ततो वातात्मजः क्रुद्धो भीमरूपं समास्थितः ॥ १६ ॥

प्रासादस्य महान्तस्य स्तम्भं हेम परिष्कृतम् ।
उत्पाटयित्वा वेगेन हनुमान् पवनात्मजः ॥ १७ ॥

ततस्तं भ्रामयामास शतधारं महाबलः ।
तत्र चाग्निः समभवत् प्रासादश् चाप्यदह्यत ॥ १८ ॥

दह्यमानं ततो दृष्ट्वा प्रासादं हरियूथपः ।
स राक्षस शतं हत्वा वज्रेणेन्द्र इवासुरान् ॥ १९ ॥

अन्तरिक्षे स्थितः श्रीमा निदं वचन मब्रवीत् ।
मादृशानां सहस्राणि विसृष्टानि महात्मनाम् ॥ २० ॥

बलिनां वानरेन्द्राणां सुग्रीव वश वर्तिनाम् ।
अटन्ति वसुधां कृत्स्नां वयमन्ये च वानराः ॥ २१ ॥

दश नागबलाः केचित् केचिद् दश गुणोत्तराः ।
केचिन् नाग सहस्रस्य बभूवुस् तुल्यविक्रमाः ॥ २२ ॥

सन्ति चौघ बलाः केचित् केचिद् वायु बलोपमाः ।
अप्रमेय बलाश्चान्ये तत्रासन् हरियूथपाः ॥ २३ ॥

ईदृग् विधैस्तु हरिभि र्वृतो दन्त नखायुधैः ।
शतैः शत सहस्रैश्च कोटीभि रयुतैरपि ॥ २४ ॥

आगमिष्यति सुग्रीवः सर्वेषां वो निषूदनः ।
नेयमस्ति पुरी लङ्का न यूयं न च रावणः ।
यस्मा दिक्ष्वाकु नाथेन बद्धं वैरं महात्मना ॥ २५ ॥

इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये सुन्दरकाण्डे त्रिचत्वारिंशः सर्गः ॥ ४३ ॥